International Journal of Sanskrit Research 2019; 5(5): 83-86

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 83-86
© 2019 IJSR
www.anantaajournal.com
Received: 18-07-2019
Accepted: 22-08-2019

**Avula Priyanka**
Junior Researcher
EFEO, Pondicherry, India

**Correspondence**
**Avula Priyanka**
Junior Researcher
EFEO, Pondicherry, India

# सामान्यन्याया

## Avula Priyanka

### प्रस्तावना

बहवो विद्वांसः दुरवगाहान् शास्त्रांशान् विशदीकर्तुं न्यायान् आश्रितवन्तः। यथा पूर्वमीमांसायां गुडजिह्विकान्यायपुरस्कारेण वेदोऽपि अर्थवादद्वारा कष्टसाध्य-यज्ञयागादिक्रतुषु मनुजानां प्रवृत्तिं कल्पयति। एवं कपिञ्जलन्यायो यत्र यत्र संख्या विशेषतो नोक्ता तत्र त्रित्वसंख्या ग्राह्येति बोधयति। आकाशे शब्दप्रसरणं वीचीतरङ्गन्यायो बोधयति। वेदान्तशास्त्रेप्येषाम् उपयोगोऽतीव वर्तते। जाग्रत्प्रपञ्चस्य मिथ्यात्वं साधयितुं शुक्तिरजतन्यायः, रज्जु-सर्पन्यायः, संसारबन्धात् विनिर्मुक्तस्य जीवस्योर्ध्वगमनबोधनाय पञ्जरमुक्तपक्षिन्यायः शरीरान्तर्वर्तिना आत्मनः एकत्वस्थापनाय जलचन्द्रन्यायः इत्यादयो गृह्यन्ते वेदान्तिभिः। अलङ्कारशास्त्रेऽपि केषांचिदलङ्काराणां न्यायमूलत्वं विद्यते। खलेकपोत-न्यायः समुच्चयालङ्कारे, काकतालीयन्यायस्समाध्यलंकारे, दण्डापूपन्यायः काव्या-र्थापत्त्यलङ्कारे इति एवमेव बहवो न्यायाः अलङ्कारशास्त्रे स्वीक्रियन्ते। एवं न्यायशब्दस्य वक्तृ-विवक्षितार्थः येन नीयते सः न्यायः इत्यर्थः कल्पयितुं शक्यते। वक्तुरथवा ग्रन्थ-कर्तुर्विवक्षितोद्देशं प्रति पाठकान् लौकिकन्यायान् नेतुमुपकुर्वन्ति। अतः लौकिकन्यायाः अपि न्यायशब्दभाजो भवितुमर्हन्ति।

### 1. अदग्धदहनन्याय

लोके साधारणतया असंस्कृत एव पदार्थः संस्कारमर्हति। संस्कारकद्रव्यञ्च योग्यतामनुसृत्य संस्कृते एव पदार्थे प्रवर्तते। एतत् साधारणलोकप्रसिद्धविषयमेव मूलभूतं स्वीकृत्यायं न्यायः प्रवर्तते। तत्र दृष्टान्तत्वेनाग्निं स्वीकृत्य अदग्धदहनन्याय इति नाम कृतम्। तथाहि – अग्निरदग्धे काष्ठादिके एव प्रवर्तते दाह्योग्यत्वात्। दग्धे भस्मीभूते न प्रवर्तते, अयोग्यत्वात्, एवं योग्यताम् अनुसृत्य कश्चित् कुत्रचित् संस्कारविशेषं यदा जनयति, तत्रायं न्यायः प्रवर्तते। भाष्ये इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च [1]

[1] पा.सू ६.२.१२७

इति सूत्रे, तथा इको झल्[2] इति सूत्रे चायं न्याय उपन्यस्तः।। इकोऽसवर्णे इत्यादिसूत्रे भाष्ये – प्रकृत्यान्तः पादम्[3] इत्यतः प्रकृत्येत्येतदनुकर्षणादेव प्रकृतिभावे सिद्धे किमर्थश्चकार इत्याशङ्क्य स्वरसन्धिर्माभूदिति समाहितम्। तदा पूर्वपक्षिणा दीर्घाणां ह्रस्ववचन-सामर्थ्यादेव स्वरसन्धिर्न भविष्यति, ह्रस्वानामपि ह्रस्वाः न प्राप्नुवन्ति। यथा न हि भुक्तवान् पुनर्भुक्ते, न वा कृतश्मश्रुः पुनः श्मश्रूणि कारयति, यतः भुजेस्तृप्तिफलत्वात्, फलाभावात् पुनः भुजेरप्रवृत्तिः। एवं श्मश्रुकरणेऽपि। अथवा सामर्थ्यात् भोजनविशेषात्, शिल्पिविशेषाद्वा पुनः प्रवृत्तिसम्भवेऽपि, तथा ह्रस्वाणां पुनर्ह्रस्वत्ववचने न किञ्चित् प्रयोजनमित्यभिधाय स्वसिद्धान्तदृढीकरणाय पूर्वपक्षिणायं न्याय उदाहृतः। "अकृतकारि खल्वपि शास्त्रमग्निवत्"। तद्यथा अग्निः यदा दग्धं तद्दहति इति। यत्र प्रयोजनं विद्यते तत्रैव शस्त्रप्रवृत्तिः। अग्निरदग्धे दग्धयोग्ये काष्ठादिक एव प्रवर्तते, भस्मीभूते तु न प्रवर्तते, दाहयोग्यत्वाभावात्।। एवं ह्रस्वाणां पुनह्रस्वत्ववचनम् अनर्थकमेवेति पूर्वपक्ष्यभिप्रायः।।

## 2. अर्धजरतीयन्यायः

लौकिकगाथानिष्पन्नोऽयं न्यायः। एकः पण्डितो दरिद्रः स्वकीयां वृद्धां गां विक्रेतुमापणम् उपजगाम। मदीया गौर्वृद्धेति कथितवान् ग्राहकान्। एवं निशाम्य वृद्धायाः न कोपि ग्राहको भवति। तदाऽत्यन्तदुःखिनं कश्चिदुवाच – युवतिर्गौरित्युच्यताम्, तदा गोविक्रयो नान्यथेति। पण्डितश्चोत्तरं ददौ – आत्मा वृद्धो न भवति, मिथ्याभाषणे धर्मनाशः इति। अतो विभज्य वृद्धापि युवतिरपीति भाषितवान्। एवमस्य न्यायस्योत्पत्तिरूह्यते।[4] केचन शास्त्रकारा अमुमेव न्यायम् इत्यमुदाजह्रुः। यथा स्त्री न तरुणी शलथस्तनत्वात्, कृष्णकेशत्वान्न जरतीति वक्तुं शक्यते तद्वत् सिद्धासिद्धं प्रयोजनं यत् तदर्धजरतीयम्।[5] अर्धं जरत्याः कामतन्ते, अर्धं नेति तदर्धजरतीयम्।[6] "न चार्धजरतीयमुचितम्, न हि कुक्कुट्या एको भागः पाकाय, अपरो भागः प्रसवाय कल्प्यतामिति कल्प्यते[7]" इति।

अर्धजरतीयशब्दस्य विग्रहसमासप्रदर्शनं श्रीमद्भिः पेरि सूर्यनारायणशास्त्रि-महोदयैः स्वीये ग्रन्थे[8] एवं निर्णीतम्। अर्धमिव जरतीवेति विग्रहे अर्धजरती इति इवार्थे समासः समासाच्च तद्विषयादिति सूत्रेण ज्ञाप्यते। अत्र समासाच्च तद्विषयात् इत्यनेन इवार्थ विषयसर्वा-वयवकात् इवार्थे छ-विधानात् समासे इवार्थद्वयनिर्वाहाय जरतीशब्दो जरत्या अर्धान्तरे नाम तस्याः जघनरूपेऽर्धान्तरे वर्तते। अर्धशब्दश्च प्रत्यासत्या जरत्या एवार्धान्तरे नाम मुखार्धान्तरे वर्तते। अर्धमिव जरतीवेति विग्रहे अर्धजरतीति इवार्थे समासोऽनेनैव सूत्रेण ज्ञाप्यते। पूर्वेत्तरपदयोः जरत्यर्धकामना, जरत्यर्धाकामनयोर्लक्षणा। सामानाधिकरण्येन च तदर्थयोः अन्वयः। एवं च जरत्यर्धकामना, जरत्यर्धाकामनासदृ-रूपोऽर्थः समासेन बोध्यते। तस्माच्च समासात् प्रकृतसूत्रेणैव इवार्थे छः। अर्धजरती इव अर्धजरतीयम् इति। भाष्ये अणिञोरनार्षयोः[9] इति सूत्रव्याख्याने – ष्यङ आदेशत्वं वा, प्रत्ययत्वं वेति विचारं प्रारभ्य, यदि प्रत्ययपक्ष आश्रीयते तर्हि औदमेघेय इति न सिध्यति। औदमेघाः इत्यत्र उदमेघस्य गोत्रापत्यं स्त्री इत्यर्थे इञन्तात् परः ष्यङ् कृते "भस्याढे तद्धिते" इति पुंवद्भावेन रूपसिद्धावपि, औदमेघेय इत्यत्र ढभिन्नप्रत्ययपरत्वाभावेन पुंवद्भावो न प्राप्नोति। इञन्तात् परस्य ष्यङो यकारः अपत्ययकारो न भवतीति यलोपोऽपि न प्राप्नोति। एवं स्थिते प्रत्ययवादी आदेशवादिन उपरि अनुबन्धौ त्वया कार्यौ इति दोषमुपस्थापितवान्। ष्यङित्यत्र ङकाररूपानुबन्धो यङश्चाप् इति चाबर्थमावश्यकम्। षकारस्तु सामान्यग्रहणाविघातार्थः कर्तव्यः। स्वरे दोषप्रसङ्गात् टापा इष्टं न

---

[2] पा.सू १.२.९

[3] पा.सू. ६.१.११५

[4] लौकिकन्यायशास्त्रार्थकला

[5] वर्धमानः गणरत्नमहोदधौ (अध्याय-३ श्लोक १९५)

[6] पतञ्जलिः – महाभाष्यम् ४.१.७८

[7] सायणाचार्यः – सर्वदर्शनसंग्रहे – (बौद्ध दर्शने, तत्र च माध्यमिक बौद्धमते)

[8] भूषणसारस्य तत्वबोधिनी व्याख्याने (धात्वर्थनिर्णये, कारिका १८)

[9] पा.सू ४.१.७८

सिध्यति। ञ्यादेशो यदि ष्यङि क्रियते, तदन्ताच्च टाप्, तदा वाराह्येत्याद्युदात्तं पदं स्यात्। तस्माद् अन्तोदात्तार्थश्चाब् विधेयः। प्रत्ययवादिमते तु प्रत्ययस्वरेणान्तोदात्तं पदं सिध्यतीत्यर्थः। तदा आदेशवादी – ञ्य एवाकृत ञकारेत्संज्ञकस्यादेशः करिष्यते, तेन ञित् स्वराभावात् प्रत्ययस्वरे टापि कृते एकादेश उदात्तेनोदात्त इति वाराह्यशब्दोऽन्तोदात्तो भवतीति, वृद्धिविषये तु ञकारस्य इत्संज्ञात्वमाश्रीयत इति समाधानं ददौ। अस्मिन् सन्दर्भे प्रत्ययवादी व्यतिरेकमुखेन अर्धजरतीयन्याय दृष्टान्तेन "न चेदानीमर्धजरतीयं लभ्यम्। वृद्धिर्मम भविष्यति, स्वरो नेति" आदेशवादिमते दोषमुदभावितवान्। यथा अर्धजरतीयस्थले विषयभेदान् कामनादि, तथा प्रवृत्यादि वक्तुं शक्यं तथा प्रकृते कार्यद्वयस्यैकनिमित्तकत्वात् वृद्धिर्भविष्यति, स्वरो नेति वक्तुं न शक्यत इति भावः।

### 3. आम्रसेकपितृतर्पणन्याय

मानवप्रकृतेरथवा लोकव्यवहारस्य वा सम्बन्ध्यं न्यायः। साधारणतः मानवः एकयैव क्रियया बहूनि फलानि प्राप्तुं वाञ्छति। भिन्नभिन्नफलप्राप्यर्थं पुनः पुनः क्रियाप्रवृत्तौ गौरवात्, समयाभावादलसत्वाच्च।

यथा ब्रह्मयज्ञपितृतर्पणादि नित्यनैमित्तिक विधीनामाम्रवृक्षमूले करणेन, तेषां सेचनं, देवपितृणामपि प्रीणनं भवति। एवं यत्रैकेनैव प्रयत्नेन फलद्वयमपि सिध्यति तत्रायं न्यायः प्रवर्तते। भाष्ये [10] किमर्थं वर्णानामुपदेशः? वृत्तिसमवायार्थः, इष्टबुध्यर्थश्चेति चेद् उदात्तादीनामप्युपदेशः कर्तव्य इत्याशङ्क्य, आकृत्युपदेशात् सिद्धमिति, संवृतादीनामपि गर्गादि-बिदादिपाठात् निवृत्तिर्भविष्यतीति समाहितम्।

तदा पूर्वपक्षिणा समुदायानां साधुत्वसाधनेन गर्गादिबिदादिपाठस्सार्थक इत्याशङ्किते गर्गादिबिदादिपाठस्य प्रयोजनद्वैविध्यं साधयितुमयं न्याय उपन्यस्तः। यथा वृक्षमूले तर्पणेन देवपितृणां प्रीतिः, वृक्षसेचनं चेति फलद्वयं सिध्यति, तथा गर्गादिबिदादिपाठेनैव समुदायस्य साधुत्वं, कलादिदोषनिवृत्तिश्चेति फलद्वयं सम्भवति।

शब्दस्याप्यर्थवत् द्विगतत्वं सम्भवति। यतो हेतवोऽर्थद्वयस्य, प्रयोजनद्वयस्य च सम्पादकाः। तत्र आम्राश्च सिक्ताः पितरश्च प्रणिता इति प्रयोजनद्वयस्योदाहरणम्। श्वेतो धावति, अलम्बुसानां यातेत्यर्थद्वयस्योदाहरणणम्।।

किं जातीयो धावति? किं वर्णो धावतीति पृष्टः कौशलात् एवं कश्चिदर्थद्वयं प्रतिपादयति – श्वेतः, अलम्बुसानामिति। अत्रानुमानादर्थान्तरसङ्ग्रहः। श्वा इत इति छेदेन कः इत्यस्योत्तरम्, श्वेत इति छेदेन कीदृश इत्यस्योत्तरमपि भवति।

एवं केषां जनपदानां गन्ता को वा समर्थ इति प्रश्ने उत्तरम् – अलम्बुसानां यातेति। अलम्बुसा देशविशेषाः। बुसानां पलालवर्णानां याता प्राप्तिमान् अलं समर्थ इति चार्थ द्वयं स्वीक्रियते।

### 4. कूपखानकन्याय

मानवस्य सहजस्वभावमनुसृत्य प्रवृत्तोऽयं न्यायो लोके सामान्यतः उत्कृष्टधर्मफलावाप्तौ स्वल्पमधर्मफलमुत्पन्नमप्यनुत्पन्नकल्पं भवति। यथा कूपखानकः कूपं खनन् यद्यपि आर्द्रा मृदा, शुष्कपांशुभिश्चावकीर्णो भवति सोऽप्सु सञ्जातासु तत एव तं गुणमासादयति, येन च स दोषो निर्हण्यते, भूयसा च अभ्युदयेन योगो भवति। एवं यत्र यत् कर्म नान्तरीयककर्म जन्यो यो विपरीतत्वमात्रेण कल्प्यो अवैधो दोषः स तत्कर्मजन्यफलेन नाश्यते तत्रास्य न्यायस्य प्रवृत्तिः।

भाष्ये किं पुनश्शब्दस्य ज्ञाने धर्मः? उत प्रयोगे? इत्याशङ्क्य यो हि शब्दान् जानाति, अपशब्दानप्यसौ जानाति।।

यथैव शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेप्यधर्मः समागच्छतीति समाहितम्। एवं सत्यपशब्दानां भूयस्त्वात् महान्तमधर्मं प्राप्नोतीत्याशङ्कायां शब्दज्ञानेन सोऽधर्मः नश्यत इति समाधातुं कूपखानकन्यायः प्रदर्शितः। यथा

[10] महाभाष्यम् (प्रश्पशाह्निकम्) नमुने ८.२.३

कूपखनननान्तरीयकशरीरव्यापारजन्यो मृल्लेपः तत्फलजलनाश्य इति सामान्यतो दृष्टानुमानात् इहापि यद्यपशब्दज्ञानेऽधर्मः, तथापि यस्त्वसौ शब्दज्ञाने धर्मः तेन स च दोषो निर्घानिष्यते, भूयसा चाभ्युदयेन योगो भविष्यतीति शब्द ज्ञाने एव धर्म इति सिद्धान्तितम्।

## 5. कैमर्थक्यन्याय

कः अर्थः यस्य तत् किमर्थकम्। तस्य भावः कैमर्थक्यम्। किमर्थकशब्देन जिज्ञासाविषय-प्रयोजनकमुच्यते। तदुत्तरभावप्रत्ययेन जिज्ञासाप्रयोजनयोः सम्बन्धो विषयविषयिभावरूप उच्यते। यदा कस्यचिद्वचनस्य, वस्तुनो वा अज्ञातप्रयोजनस्य प्रयोजनजिज्ञासा तदा किमर्थमिति प्रश्न उत्पद्यते। सामान्यस्तत्र प्रयोजनाभाव एव प्रयोजनाज्ञाने हेतुर्भवति। तथा च निष्प्रयोजनत्वम् एव पर्यवस्यति।

एवञ्च निष्प्रयोजनकस्य विषयस्य प्रयोजनजिज्ञासायामेषन्यायः प्रवर्तते। यत्र तत्साध्यस्य अर्थस्य सिद्धवत् किमर्थमिति प्रश्नस्तस्यैव नियमार्थत्वं न तु प्रयोजने सति। श्लिष आलिङ्गने [11] इति सूत्रे भाष्ये – श्लिष धातोः पुषादिपाठादेव "पुषादिद्युताद्यलृदितः परस्मैपदेषु" इति सूत्रेण अङ् प्रत्यये प्राप्ते तद्बाधनाय विध्यर्थमिदं सूत्रम्? अथ पूर्वेण शल इगुपधादनिटः क्सः इत्यनेन क्से सिद्धे नियमार्थमिदं सूत्रं भवतीत्याशङ्क्य, यदि नियमार्थं स्वीक्रियते, श्लिष आलिङ्गन एव क्सो यथा स्यात्। समाश्लिषत्, उपाश्लिषदित्यत्र सम्बन्धमात्रं श्लिषधात्वर्थ इति तत्र क्सो न स्यादित्यभि-हितम्। तदा भाष्यकाराः श्लिष आलिङ्गने इत्येतत् सूत्रं विध्यर्थमेव भवति। कैमर्थक्यान्नियमो भवति। पूर्वसूत्रेणैव सिद्धे, अनेन पुनः किं विधीयते, किं वा प्रयोजनमित्याशङ्कायां नियमो भवति, विधेयस्याभावे तु नियमो न भवति। पुषादिपाठात् प्राप्त-अङ् बाधनार्थमारब्धः क्सो विधिरेव भवति, न नियम इति समाहितवन्तः।

ननु यदायं नियमो न स्यात्, आत्मनेपदेष्वालिङ्गने, अनालिङ्गने च क्सः प्रसज्यते इति चेत्। न। योगविभागः करिष्यते। प्रथममङ्बाधकतया श्लिषः क्सो विधीयते। अनन्तरमालिङ्गने च श्लिषः क्सो भवतीति नियमार्थम्। योगविभागसामर्थ्याच्च नियमेन सर्वाङ्गप्राप्तिबाधः।

## उपसंहार

लौकिकन्यायाः, सूक्तयः, सुभाषितानि, नीतयः आभाणकान्येतानि सर्वाण्यपि लोकोक्तिसाहित्ये प्रत्येकशाखात्वेन विराजन्ते। यद्यप्येतेषां सन्मार्गोपदेशादि प्रयोजनेषु साम्यं वर्तते तथापि स्वरूपे, प्रसङ्गे, समन्वये अंशान्तरेषु चैतानि परस्परं भिद्यन्ते। किन्त्वेतानि सर्वाण्यपि लोकोक्तिनाम्नैव आद्रियन्ते। एतेषां सर्वेषां लक्षणनिरूपण-द्वारेण तेषां भेदमप्यत्र प्रदर्शयितुमुपक्रम्यते।

## उपयुक्तग्रन्थसूची


1. न्यायकोशः, म. म. भीमाचार्यः, वासुदेवशास्त्री अभ्यङ्कर, Bhandarkar Pracyavidya Samsodhana Mandir, Poona, १९९६.
2. न्यायसिद्धान्तमुक्तावली, श्रीविश्वनाथपञ्चाननः, चौखम्बा संस्कृत सिरीज् आफीस्, वाराणसी, १९८२.
3. लौकिकन्यायसाहस्त्री, वी.के.दलाई, प्रतिभा प्रकाशन, नई दिल्ली,२०११
4. लौकिकन्याय शास्त्रार्थ कला, वेणिमाधवशास्त्री, जयकृष्ण दास् पब्लिकेषन्स्, वारणासी, १९३९.
5. लौकिकन्यायकोशः, पि.जि.लाल्ये, भारतीय कला प्रकाशन, नई दिल्ली, २००६


[11] पा.सू ३.१.४६